This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

22

॥ हस्तामलकस्तोत्रप्रारंभः॥

Acc. No. ~~3545.~~ M-1896
Title - हस्तामलक स्तोत्र सटीक
Author - ?
Date - संवत्

folio - 10
Xerox - 20
Sub - वेदान्त, स्तोत्र.

Checked 2012

K K S U LIBRARY
RAMTEK
441 106
M-1896
Dist. Nagpur

1

ह०

१

तयेप्री

॥श्रीगणेशायनमः॥ शंकरउवाच॥ कस्त्वंशिशोकस्यकुतो
सिगंताकिंनामनेत्वंकुतआगतोसि॥ एतद्वदत्वंममसुप्रसि
द्धंमत्प्रीतिविवर्द्धनोसि॥१॥ हस्तामलउवाच॥ नाहंमनुष्यो
नचदेवयक्षोनब्राह्मणक्षत्रियवैश्यशूद्रः॥ नब्रह्मचारीन
गृहीवनस्थोभिक्षुर्नचाहंनिजबोधरूपः॥२॥ निमित्तंमनश्च
क्षुरादिप्रवृत्तौनिरस्ताखिलोपाधिराकाशकल्पः॥ रविर्लो
कचेष्टानिमित्तंयथायःसनित्योपलब्धिस्वरूपोहमात्मा॥३॥
निमित्तेति॥ मनआदीनांमनश्चित्ताहंकारबुद्धीनांचतुर्णा
मंतःकरणानांतथाचक्षुरादीनांचक्षुत्वक्श्रोत्रजिव्हाना
सिकानांपंचबुद्धींद्रियाणांवाक्पाणिपादपायूपस्थानांपं
चकर्मेंद्रियाणां॥ प्रवृत्तौस्वस्वव्यापारेनिमित्तंहेतुर्यः॥सो

राम
१

Checked 2012

हंमात्मेतिसंबंधः नित्योपलब्धिस्वरूपंयस्यसः॥ तथोक्त
रविरादित्योयथायेनप्रकारेणप्रकाशकत्वेन॥ लोकानां
चेष्टायांपरिस्पंदनेनिमित्तं॥ तथाचाधिष्ठातृत्वेनयोनि
मित्तंसोहंमात्मेतिसंबंधमित्यर्थः॥ इयंदृष्टिरात्मतत्त्वंमाय नो ४
त्वेनदर्शितापरमार्थवस्तुतस्तुनिरस्तानिराकृताअखि
लानिर्विशेषाउपाधयोबुद्ध्यादिलक्षणायस्यसतथो
८ क्तः॥ निरस्ताखिलोपाधिरेवआकाशकल्पः॥ आकाशव क ७
व द्विश्वंह्यायः सोहंमात्मेतियथाविशुद्धआकाशेसहसे
वाभ्रमंडलंभूत्वाविलीयतेतद्वदात्मनीहाखिलमितिभा
वः॥ ३॥ ननुमनश्चक्षुरादिप्रवृत्तौकिमर्थमधिष्ठानमीष्य
ते॥ स्वयंकस्मान्नप्रवर्ततेकथंचनित्योपलब्धिस्वरूपत्व

मधिष्ठातुरित्याहि ॥ यमग्न्युष्णवन्नित्यबोधस्वरूपं मनश्चक्षुरादी
प्रबोधात्मकानि ॥ प्रवर्तंत आश्रित्य निःकंपमेकं स नित्यो० ॥ ४ ॥
यमेति ॥ यंनित्यबोधस्वरूपं आत्मानं आश्रित्य मनश्चक्षुरादी
नि प्रवर्तंते सोहमात्मेति संबंधः ॥ अग्न्युष्णवदिति यथा उष्ण
त्वं अग्नितो न व्यतिरिच्यते व्यतिरेके हि कदाचिदग्नितोन्यत्रा
प्युपलभ्यते यथा पुरुषाद्दंडः न चैवमस्ति तस्मादग्निस्वरू
पमेवोष्णं ॥ एवमात्मनोपि चित्स्वरूपत्वमित्यर्थः यथोक्तः ॥ निरं
शत्वाद्विभूत्वाच्च तथानश्वरभावतः ॥ ब्रह्मव्योम्नोन भेदोस्ति
चैतन्यं ब्रह्मणोधिकं ॥ ननु मनश्चक्षुरादिप्रवृत्तौ किमर्थम
धिष्ठातेष्यते स्वयं कस्मान्न प्रवर्तंते इत्यत आह ॥ अबोधात्म
कानि इति हेतुगर्भविशेषणां ततश्चायमर्थो भवति ॥ अबो

धकत्वादचैतन्यत्वात् घटादिवत्॥ चेतनं अधिष्ठातारमाश्रि
त्य प्रवर्त्ततेइति॥ अचेतनत्वं चैषां ज्ञेयत्वात्॥ घटादिवत्॥ श्रु
तिश्च॥ नान्योतोस्ति द्रष्टेत्यादिना॥ आत्मव्यतिरिक्तस्य चेतन
त्वं प्रतिषेधयति अतो युक्तमुक्तं चेतनं आत्मानं आश्रित्य प्र
वर्त्ततेइति निःकंपं निस्तरंगं निःसंशयमित्यर्थः॥ तथा च
श्रुति॥ भिद्यंते हृदयग्रंथी छिद्यंते सर्वसंशयाः॥ क्षीयंते
चास्य कर्माणि तस्मिन्दृष्टे परापरे॥ एकमेवाद्वितीयं ब्रह्मः
एकमद्वितीयं स एकत्वं देवतिर्यक् मनुष्यादिशरीरेष्वेकं
न तु नानासंख्यादिपरिकल्पितमेवेदं नानाभूतमित्यर्थः॥ ४
नन्वात्मन एकत्वे सुखदुःखादिव्यवस्थान स्यात्॥ तथा हि स
र्वशरीरेषु यद्येक आत्मा भवेत्॥ तदा कस्मिन् सुखिनि सर्व

ठ०

३

एवसुखिनस्यु॥सर्वत्रतस्याविशेषात्एवसमेकस्मिन्दुःखि
निसर्वएवदुःखिनोभवेयुः॥एवमेकस्मिन्जानीतिसर्वएव
जानीयुःतथाएकस्मिन्जायमानेम्रियमानेवासर्वएवजाये
रन्म्रियेरन॥एकस्मिनवद्धेमुक्तेसर्वएववद्धेमुक्तेरन्॥इ
तिनचैवमस्तितस्मात्नैकत्वमात्मानोभवितुमर्हतिअतआ
ह॥मुखाभासकोदर्प्पणेदृश्यमानोमुखत्वात्पृथक्त्वेननै
वास्तिवस्तु॥चिदाभासकोधीषुजीवोपितद्वत्सनित्यो॰
॥५॥मुखेतिमुखाभासकोमुखप्रतिबिंबरूपोदर्पणेदर्पणे
जातोनानाप्रकारेषुदर्पणेषुइतियावत्॥दृश्यमाणोमुख
त्वात्॥परमार्थतमुखस्वरूपात्पृथक्त्वेनभेदेननैवास्तिव
स्तुयद्यपि॥मुखाभासकोनामवस्तुनास्तिएव॥तथाप्युपा

राम
३

धिभेदात्‌यथापरमार्थतोमुखात्‌॥परस्परंचतेमुखाभास
काःभिन्नाःप्रतीयंतेतथाचोपाधिगतमलीनत्वादिध
र्माःप्रयंतीयंतेतद्वत्‌मुखाभासकवत्‌॥चिदाभासकआ
त्मप्रतिबिंबःधीषुबुद्धिषुःदृश्यमाणोजीवइत्युच्यतेयः॥
सोहमात्माजीवास्तेउपाधिभेदात्‌भिन्नाःप्रतिभासतो
उपाधिगतदुःखसुखादिभिश्चसुखदुःखादिगंतःप्र
तीयंतेउपाधयश्चव्यवस्थितरूपा॥एवेतिसुखदुःखादी
नामेकात्मापक्षेपिव्यवस्थायुक्तैवनात्माभेदःशक्यते
पि३ व्यवस्थाप[illegible]तुंश्रुतिश्चएकात्मानमेवप्रतिपादयति॥
एकमेवाद्वितीयमितिभेदंचप्रतिषेधयति॥नेहनाना
स्तिकिंचनेत्यादि॥प॥अतःसाधूक्तमेकमेवेति॥नन्वेवंस

ह०
४

तिआत्मनस्तावत्सुखदुःखादिसंबंधाभावात्मोक्षाभा
वेतिबोधहिउच्यतेनाबद्धयति॥तथाचिदाभासक
स्यापिबंधमोक्षोनविद्यते॥अवस्तुत्वात्तस्याबुद्धे
रपिविनासित्वात्बंधमोक्षयोरभावः॥ततश्चमोक्ष
शास्त्रस्यानर्थकत्वमापन्नमित्यतआह॥यथादर्पणा
भावआभासहानौमुखंविद्यतेकल्पनाहीनमेकं॥तथा
धीवियोगेनिराभासकोयःसनित्यो॰॥६॥यथेति॥यथाद
र्पणस्याभावेसतिआभासस्यमुखप्रतिबिंबस्यहानौस
त्यंमुखंपरमार्थकल्पनाहीनमिथ्याज्ञानरहितएकमेव
परंविद्यते॥तथातेनैवप्रकारेणधीवियोगेषुबुद्धेरभावे
शांतिनिराभासकोनिःप्रतिबिंबःपरमार्थःसन्नेकएवयः

राम
४

सोहमात्मा अयमर्थः॥ आत्माज्ञानकृतोयं बुद्ध्यादिप्रपंचस्त
त्रबुद्ध्यादौ प्रतिबिंबस्वरूपेणात्मानमध्यस्यति ततश्चत
त्कृतसुखदुःखादिकं आत्मन्यध्यस्यतीति सोयमध्यासो बंधः॥
आत्मज्ञानेन उद्भूतेन अज्ञाननिर्वृत्या बुद्ध्यादिप्रपंचनिवृ
त्तौ अध्यासनिवृत्तौ अध्यासनिवृत्तिरिति अध्यस्यनिवृत्ति
श्च॥ न पुनः परमार्थको बंधमोक्षौ कस्यचिद्विद्यते ति॥ ६॥
सर्वमसमंजसः केचित्॥ खलु देहात्मवादिनो देहमेवात्मा
नं मन्यंते ज्ञानप्रसाहः मनश्चक्षुरादेर्वियुक्तः स्वयं यो मन
श्चक्षुरादिः॥ मनश्चक्षुरादेरगम्यस्वरूपः स नित्यो॥ ७॥
मनेति॥ मनआदेश्चक्षुरादेर्वियुक्तः पृथक्भूतोयः सोहमा
त्मेति संबंधः मनश्चक्षुराद्युपादानेन तदंतर्गत्वात् शरीर

ह०
५

मुपाधितंदृष्टव्यं॥ एतेनशरीराद्यपिद्रष्टस्यतेत्वगत्याशुद्ध्यासू
क्ष्ममयासूक्ष्मदृष्टिभिः इतिसमस्तेवियुक्तमितिलभ्यते॥ के
थंमनश्चक्षुरादेर्वियुक्तो अत आह॥ मनइत्यादि अयमात्मा
मनश्चक्षुरादिकस्यप्रकाश्यमनश्चक्षुरादेरिव॥ मनश्च
क्षुरादेः प्रकाशगुणयोगात्॥ अयमर्थः॥ यथावाह्यघटप
रादेः प्रकाशकोमनश्चक्षुरादेस्ततोन्यः तथांतरस्यापि
मनश्चक्षुरादेः प्रकाशकआत्माततोव्यतिरिक्तः इतिनि
श्चीयते अतएवमनश्चक्षुरादीनांनानात्मत्वमितिसिद्धं
ज्ञेयादन्योहिज्ञाताभवति॥ ननुआत्मनोपिज्ञेयत्वात् अना
त्मत्वंप्रसज्येत् अत आह॥ मनश्चक्षुरादेरगम्यस्वरूपः
अप्राप्तस्वरूपः तथाचश्रुतिः॥ यतोवाचोनिवर्त्तंते अप्रा

राम
५

10

प्यमनसासहेति॥७॥ननुयदिआत्मामनश्चक्षुरादेरगम्यः
कथमस्यसिद्धिः घटपटादयोहि मनश्चक्षुराद्याधीनसि
द्धयः दृष्टासंतः॥आत्मापितदधीनसिद्धिः युक्तः अतः तदा
धीनसिद्धिर्नभवतितदासिद्धिरेवनस्यात् शशविषाण
वत् इत्यत आह॥यएकोविभातिस्वतःशुद्धचेताःप्रका
शस्वरूपोपिनानेवधीषु॥शरावोदकस्थोयथाभानु
रेकः सनित्यो०॥८॥यइतिस्वतःशुद्धता आलयः स्वतः
स्वयमेवनपरतःशुद्धंनिर्मलोचेतोमनोयस्यसःशुद्ध
चेताःशुद्धचेतसिआत्मास्वयमेवस्फुरतिइत्यर्थः॥अत
एवचित्तशुद्धार्थंवेदानुवचनादयोविहिताः॥तमेतवेदा
नुवचनेनब्राह्मणाविविदिषंति॥यज्ञेनदानेनतपसाना

KKSU LIBRARY
RAMTEK
441 106
M-1896
Dist. Nagpur

शकेनेतिघटपटादयश्चजडत्वात्॥ अप्रकाशात्रूपत्वात्
आत्मातुप्रकाशांतरानपेक्ष्यप्रकाशते॥ यथासवितास्वप्र
काशप्रकाशांतरंनापेक्ष्यते॥ अथचप्रकाशतेनतद्वदात्मापी
तिभातीतिभावः॥ एवमुत्पन्नेज्ञानेयोजीवन्मुक्तः प्रकाशरू
पोपिपरमार्थतोनानाधीषुनानाइवविभातियःसोऽहमात्मा
शरावोदकेषुउपाधिषुस्थितोयथाभानुरादित्यः प्रकाशस्व
रूपोपिएकरूपःसन्नानेवभातितद्वदात्मापीति॥ ८॥ न
नुकथमेकमेवआत्मायुगपदनेकांबुधिमधितिष्ठति॥
नह्येकएवाश्ववाहकोयुगपदनेकानश्वान्॥ अधितिष्ठ
नुपलक्षतेक्रमेणात्वधिष्ठानयुक्तंनत्विहनानास्ति॥ युग
पत्सर्वासांबुद्धीनां॥ स्वस्वव्यापारेप्रवर्तिदर्शनात्॥ अधिष्ठा

नराणांच प्रवरतिर्दर्शनाभावादतोनेक आत्मा अत आह ॥ यथानेकचक्षुः प्रकाशो रविर्न क्रमेण प्रकाशीकरोति प्रकास्यं ॥ अनेकाधियोयस्तथैकप्रवोधः स नित्यो ॥ ९ ॥ यथेति यथा येन प्रकारेण रविरादित्य एक एवानेकेषांचक्षुः प्रकाशो युगपदेक एवानेकचक्षुषांअधितिष्ठति न च क्रमेण एकैकस्मिन् चक्षुषि प्रकाश्यं प्रकाशीकरोति तथा तेनैव प्रकारेण ॥ एकश्चासौ प्रवोधश्चेति एकप्रवोधः ॥ ईश्वर अनेकाधियोवुद्धिर्युगपदधितिष्ठति ॥ न क्रमेणैकैकस्मिन् धियो प्रकाशी प्रकाश्यं करोति सोहंमात्मेति संवंधः ॥ ९ ॥ नन्वस्तु तर्हि रविरेवानेकवुद्धिनामधिष्ठाता किमात्माभ्युपगमनेति ॥ तथा च श्रुतिः धियः प्रेरय

तिअतआह ॥ विवस्वत्प्रभाते यथारूपमक्षं प्रगृह्णाति ना
भातिमेवं विवस्वान् ॥ तथाभास आभास प्रत्यक्षमेकः स
नित्यो० ॥१०॥ विवस्वेति विवस्वतादित्येन प्रभातं प्रकाशि
तंअक्षंचक्षुर्यथारूपं घटादि प्रगृह्णाति प्रकर्षेणाजा
नाति ॥ नाभासन्न प्रकाशितं अंधकारे घटानुपलंभात् ॥ ए
वंसति विवस्वानप्येकं तथा तेनैव प्रकारेण भातः प्रकाशि
तोअधिष्ठितः सन् आभासयति अधितिष्ठति ॥ अक्षंचक्षुः
यस्य विवस्वतोअधिष्ठाता सोहमात्मेति ॥ सचसर्वेषां भू
तानामधिष्ठाताश्च साचक्षुरधिष्ठानमभिप्रेत्य विवस्व
तोबुद्धिप्रेरकत्वमभिहितं ॥ यस्माद्विवस्वदधिष्ठितं चक्षु
र्बुद्धिमुत्पादयति ॥१०॥ ननु तर्हि प्रकारांतरेण अधिष्ठातृ

व्यः॥ आत्मनः तस्य प्रकाशकत्वात्॥ नान्योतोस्ति द्रष्टेति
श्रुत्याद्द्रष्टांतरप्रतिषेधात् इति किंच॥ यथा सूर्य एको
स्वनेकश्चलासु स्थिरास्वप्यनन्वग्विभाव्यस्वरूपः॥ च
लासु प्रभिन्नासु धीष्वेकमेवस नित्यो०॥११॥ यथेति यथा
येनप्रकारेण॥ आदित्य एकः अप्सुवारिषु रविचलासु
वास्थिराषु च अनेकोपि नानापि सन्॥ नन्वग्विभाव्यंस्व
रूपं यस्य सः॥ तथोक्तः नवारिषु रविरनुगतो भवति किं
तर्हि तथैव नभसि देदीप्यमानो भ्रांत्या नवारिषु दृश्य
तः इत्यर्थः॥ एकमेवमात्मा चलासु प्रभिन्नासु नानाभू
तेषु अनेकः सन्॥ अनन्वक् विभाव्यरूपः न बुद्धि
रनुगच्छति॥ किं तर्हि पृथगेव देदीप्यते यः सोहमात्मे

सूर्यः॥११॥घनछिन्नदृष्टिर्घनछिन्नमर्कं यथा निःप्रभं
मन्यते चात्ति मूढः॥तथा बद्धवद्भाति यो मूढदृष्टिः स नि
त्यो॰ ॥१२॥ यथा येन प्रकारेण मेघेन छिन्ना तिरोहिता दृ
ष्टिर्दर्शनं यस्य सः घनछिन्नदृष्टिपुरुषः घनेन छि
न्नमर्कं निःप्रभं प्रभारहितं मन्यते जानाति॥अप्रकाश
स्वरूपमिति यावत् मूर्खो हि मन्यते घनछिन्नदृष्टित्वा
त् प्रकाशस्वरूपमपि रविप्रकासमहं पश्यामि इति अ
ति मूढो मूर्खः॥स चात्मनो दृष्टिविषेषतमगणायनूय
था सूर्यः॥एवाप्रकाशं मन्यते पादपूर्णार्थश्चशब्दः॥तथा
तेनैव प्रकारेण अविद्याछिन्नदृष्टिः बुद्धिमात्मत्वेन ग
हीत्वा तद्गतसुखदुःखादिकमात्मनि मन्यमानो बद्धइव

योविभाति॥मूढमतिमूढदृष्टिः सोहमात्म्येत्यर्थः॥१२॥समस्तेषुवस्तुष्वनुस्यूतमेकंसमस्तानिवस्तूनियन्नस्पर्शंतिवियद्वत्सदाशुद्धमच्छस्वरूपंसनित्यो॰॥१३॥समस्तेषुनिर्विशेषेषुप्रपंचात्मकेषुसदात्मनअनुस्यूतंअनुगतमेकंसमस्तानिवस्तूनिःप्रपंचात्मकानियत्सद्रूपंनस्पर्शंतिकुतोवियद्वदाकाशमिवसदासर्वदाशुद्धंनिर्मलस्वरूपंअमूर्त्तस्वरूपंयतएकमेवपरंब्रह्मयःसोहमात्मेतिकथमेकस्यसर्वव्यापित्वंदृष्टंततःश्रुतिः॥एकोदेवःसर्वभूतेषुगूढःसर्वव्यापिसर्वभूतांतरात्मा॥कर्माध्यक्षःसर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्चइतिश्रुत्या॥सर्वव्यापित्वंदर्शयित्वा॥१३॥व्युत्पादितम

र्थंसंहरतियथादीपमेकंघटस्छिद्रभिन्नंप्रभावंकरो
तिप्रकाशास्वरूपंतथाबुद्धिभेदेयमेकप्रकाश॥सनि
स्योप०॥१४॥उपाधौयथाभेदतासन्मणीनांतथाभेदता
बुद्धिभेदेषुतेपि॥यथाचंद्रिकाणांजलेचंचलत्वंतथाचं
चलत्वंतवापीहविभ्मो॥१४॥यथावेददृष्येवतेसूत्रकादौ
दृढाबुद्धिरुत्पद्यतेसूतकीतितथावेदवेद्यंविसुद्धात्म
तत्वंस्वकीयंगृहीतंविवादःकथंते॥उपाधौसतियथा
भेदतास्वार्थेतितुसन्मणीनांस्फाटकादीनांसलोहित
रुक्मादिभेदेनयथाभेदतातथाभेदताबुद्धिभेदेषु॥ना
नाबुद्धिषुतेपितवापीहविभ्मो॥परमार्थवस्तुभेदोनास्त्ये
वबुद्धिकृतस्तुविद्यतेइत्यर्थः॥यथाचंद्रएवचंद्रिकाइय

र्थः॥स्वार्थैकप्रतिविंवेदृश्यमाणानांजलस्यचंचलत्वा
देषामपिचंचलत्वं॥तथावुद्धीनांचंचलत्वात्तवापिचं
चलत्वमेवोपाधिकंनपरमार्थिकमिहवुद्धेषुहेविद्मो
इति॥१४॥इतिश्रीहस्तामलकटीकाब्रह्मोपनिषदासंपू
र्णम्॥शुभंमस्तु॥॥॥श्रीरामजयराम॥जयजयराम॥ ॥

पठनार्थं गोसावीप्रान्नारतीजी सं:१८८७ माघवसु ५३

ह॰
१०

॥ हस्तामलकस्तोत्रसमाप्तं ॥

3545

राम
१०

K K S U LIBRARY
RAMTEK
441 106
M-1896
Dist. Nagpur

```
[OrderDescription]
,CREATED=20.10.20 16:25
,TRANSFERRED=2020/10/20 at 16:28:42
,PAGES=20
,TYPE=STD
,NAME=S0004252
,Book Name=M-1896-HASTMALAK STROT STIK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
```

FILE19=00000019.TIF
,FILE20=00000020.TIF
,